

अन्तकृद्दशोपनिषद्

जं चेव जाणामि
तं चेव न याणामि

पञ्चमगणधर-सर्वलब्धिनिधान-श्रीसुधर्मस्वामिप्रणीत

अन्तकृद्दशाङ्गसूत्रस्य

सारसञ्चयरूपा

# अन्तकृद्दशोपनिषद्

શાસન સમ્રાટ ભવન
ક્રમાંક:
સ્થાન:

• सञ्चयनम् - सम्पादनम् •

प्राचीनश्रुतोद्धारक

प.पू.आ.श्रीहेमचन्द्रसूरीश्वरशिष्याः

प.पू.आ.श्रीकल्याणबोधिसूरयः

प्रकाशकः

श्री जिनशासन आराधना ट्रस्ट

**મૂળસૂત્ર** : **અન્તકૃદ્દશા અંગસૂત્ર**
**મૂળ સૂત્રકાર** : પંચમ ગણધર સર્વલબ્ધિનિધાન
શ્રી **સુધર્માસ્વામી** ભગવાન

**નવનિર્મિત**
**સંસ્કૃત સારસંચય** : અન્તકૃદ્દશોપનિષદ્
**સંચયકાર + સંપાદક** : પ્રાચીનશ્રુતોદ્ધારક પ.પૂ.આ.દે. શ્રીમદ્વિજય **હેમચન્દ્રસૂરીશ્વરજી** મહારાજાના શિષ્ય
પ.પૂ.આ.દે. શ્રીમદ્વિજય
**કલ્યાણબોધિસૂરીશ્વરજી** મહારાજા

**સહયોગી** : મુનિરાજશ્રી ભાવપ્રેમ-તત્ત્વપ્રેમ-
રાજપ્રેમવિજયજી મ.સા.

**વિષય** : મોક્ષગામી મહાત્માઓની કથા

**વિશેષતા** : નિશ્ચય-વ્યવહારના સમન્વયથી જ મોક્ષપ્રાપ્તિ શક્ય છે, આ સિદ્ધાન્તને સત્યકથા દ્વારા સ્પષ્ટ કરતું એક અદ્ભુત આગમસૂત્ર

**મુદ્રક** : મલ્ટી ગ્રાફિક્સ
www.multygraphics.com

સને 2012 • પ્રથમ આવૃત્તિ • વિ.સં.૨૦૬૮ • વી.સં.૨૫૩૮

પ્રતિ : 500

*No Copyright. • Reproduction Welcome.*

## પ્રાપ્તિસ્થાન


### 1) શ્રી અક્ષયભાઈ શાહ

506, પદ્મ એપાર્ટ., જૈન દેરાસર સામે, સર્વોદયનગર,
મુલુંડ (પ.), મુંબઈ-400 080. મો.: 9594555505
Email : jinshasan108@gmail.com

### 2) શ્રી ચંદ્રકાંતભાઈ સંઘવી

6-બી, અશોકા કોમ્પલેક્સ, જનતા અસ્પતાલ પાસે,
પાટણ (ઉ.ગુ.) ફોન : 9909468572

### 3) મલ્ટી ગ્રાફિક્સ


18, Vardhaman Bldg., 3rd Floor, Khotachi Wadi,
Prarthana Samaj, V. P. Road, Mumbai – 4.
Ph.: 23873222 / 23884222.
E-mail : support@multygraphics.com


---


પ્રસ્તુત પ્રકાશન જ્ઞાનનિધિમાંથી થયેલ છે. માટે ગૃહસ્થો જ્ઞાનનિધિમાં તેનું મૂલ્ય અર્પણ કરીને માલિકી કરી શકશે.

*Website : www.divineKnowledge.org.in*

## चरमतीर्थपतिः करुणासागरः श्रीमहावीरस्वामी




## અનરાધાર અનુગ્રહ



## अनन्तलब्धिनिधानः श्रीगौतमस्वामी

# पञ्चमगणधरः श्रीसुधर्मास्वामी



## કૃપા વરસે અનરાધાર

સિદ્ધાંતમહોદધિ સુવિશાલગચ્છસર્જક પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય પ્રેમસૂરીશ્વરજી મહારાજા**

વર્ધમાન તપોનિધિ ન્યાયવિશારદ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય ભુવનભાનુસૂરીશ્વરજી મહારાજા**

અજોડ ગુરુસમર્પિત ગુણગણનિધિ પ. પૂ. પંન્યાસપ્રવર
**શ્રી પદ્મવિજયજી ગણિવર્ય**

સિદ્ધાંત દિવાકર પ. પૂ. ગચ્છાધિપતિ આચાર્યદેવ
**શ્રીમદ્વિજય જયઘોષસૂરીશ્વરજી મહારાજા**

વૈરાગ્યદેશનાદક્ષ પ. પૂ. આચાર્યદેવ
**શ્રીમદ્વિજય હેમચન્દ્રસૂરીશ્વરજી મહારાજા**

# ❀ પ્રકાશકીય ❀

કુશળ અધ્યાપકોની અધ્યાપનશૈલી એવી હોય છે, કે તેઓ પહેલા આખો પદાર્થ સમજાવી દે, પછી કહે, 'હવે ચોપડી ખોલો, ને વાંચો.' વાંચતા જઈએ ને જાણે વાર્તા હોય, એમ સમજાતું જાય. દુર્ગમ ગ્રંથ પણ સુગમ બની જાય.

આ જ શૈલી આગમ-અધ્યયનમાં પણ ઉપયોગી બને, એ માટે કુશળ અધ્યાપકની ગરજ સારે તેવી આ આગમ ઉપનિષદ્‌ની શ્રેણિ પ્રકાશિત કરતા રોમહર્ષ અનુભવીએ છીએ. અધિકારી સંયમી ભગવંતોનો આગમ-અભ્યાસ આ શ્રેણિ દ્વારા સુગમ બને...

અને અભ્યાસ બાદ પણ આ વિહારોપયોગી પ્રકાશનના આલંબને દીર્ઘ કાળ સુધી આગમિક પદાર્થોના પરાવર્તન થતા રહે... આ ઉપહાર આપણને બહુશ્રુતોનો ઉપહાર આપે.. એવી સહજ સંવેદના થાય છે. વંદન... પરમ કૃપાળુ પરમાત્માને. વંદન... પૂજનીય શ્રીગણધર ભગવંતો આદિ પૂર્વાચાર્યોને. વંદન... આગમ અધ્યયનનું આ આલંબન આપનાર પૂજ્યશ્રીને.

*લિ.*

***શ્રી જિનશાસન આરાધના ટ્રસ્ટ***


## ટ્રસ્ટીઓ

શ્રી ચંદ્રકુમાર જરીવાલા   શ્રી પુંડરીકભાઈ શાહ

શ્રી લલિતભાઈ કોઠારી   શ્રી વિનયચંદ્ર કોઠારી

णमोत्थु णं समणस्स भगवओ महावीरस्स
श्री प्रेम-भुवनभानु-पद्म-जयघोष-हेमचन्द्रसूरिभ्यो नमः

# પૂર્ણવિરામ

કથા નેવું શૂરવીરોની
જેઓ
લડ્યા નહીં
તૂટી જ પડ્યા
સંસાર પર
ને કર્યો
એનો અંત.

બનાવી લઈએ આને
આપણી પોતાની કથા
વધુ કોઈ અપેક્ષા નથી
સંસારના અંતને.

– આ. કલ્યાણબોધિસૂરિ

अथ

# अन्तकृद्दशोपनिषद्

श्रीवर्द्धमानं जिनवर्द्धमानं,
सूरीन्द्रमेवं गुरुहेमचन्द्रम्।
प्रणम्य नम्यं रमणीयरम्यं,
ब्रुवेऽन्तकृत्सद्दशके रहस्यम्।

अष्टावत्र वर्गाः (१) तत्राद्ये वर्गे दशाध्ययनानि, तद्यथा- गौतमः, समुद्रः, सागरः, गम्भीरः, स्तिमितः, अचलः, काम्पिल्यः, अक्षोभः, प्रसेनजित्, विष्णुश्च।

॥ १ ॥

(१-१) द्वारिकानगरी, अन्धकवृष्णि-राजा, धारिणीदेवी, सिंहस्वप्नसूचितस्तत्पुत्रो गौतमः, भगवत्युक्तमहाबलकुमारवदस्य वक्तव्यता यावदष्टकन्यापरिणयः, सुखमग्नता च, भगवदरिष्टनेम्यागमनम्, देशनाश्रुतिः, मेघकुमारवत्प्रव्रज्या, एकादशाङ्गाध्ययनम्, द्वादशभिक्षुप्रतिमाऽऽराधना गुणरत्नसंवत्सरतपश्च स्कन्दकवत्। ततोऽपि तद्वदेव चिन्ता भगवत्पृच्छा च। स्थविरैः सह शत्रुञ्जयाऽऽरोहणम्, मासिकसंलेखना, द्वादशवार्षिकपर्यायः, यावत् सिद्धः।

(१-२-१०) शेषनवाध्ययनान्यप्येवमेव ज्ञेयानि अन्धकवृष्णिधारिण्योरेव पुत्राणां समुद्रादीनां सिद्धिप्रतिपादनपराणि।

(२- १-८) तयोरेव पित्रोरपरेऽष्टौ पुत्राः- अक्षोभः, सागरः, समुद्रः, हिमवान्, अचलः, धरणः, पूरणः, अभिचन्द्रः। एषामपि गौतमादीनामिव ज्ञेया वक्तव्यता, नवरं पर्यायः षोडशवर्षाणि।

(३) तृतीयवर्गे त्रयोदशाध्ययनानि - अनीतयशाः, अनन्तसेनः, अनिहतः, विद्वान्, देवयशाः, शत्रुसेनः, सारणः,

गजः, सुमुखः, दुर्मुखः, कूपकः, दारुकः, अनादृष्टिः।

(३-१) भद्रिलपुरे नागगाथापतिः, सुलसाभार्या तयोः पुत्रोऽनीतयशाः, द्वात्रिंशदिभ्यकन्यापरिणयः, द्वात्रिंशद्धिरण्यकोटिस्वामित्वम्, भगवदरिष्टनेमिदेशनाश्रुतिः, प्रव्रज्यादि गौतमवत्, नवरं चतुर्दशपूर्वाध्ययनम्, विंशतिवर्षपर्यायः। गौतमवदेव शत्रुञ्जये सिद्धिः।

(३-२-६) अनीतयशोवदेव ज्ञेयम्।

(३-७) द्वारिकानगरी, वसुदेवराज-

धारिणीदेव्योः सिंहस्वप्नसूचितः पुत्रः सारणः, पञ्चाशत्कन्यापरिणयः, पञ्चाशत्कोटिहिरण्यस्वामित्वम् शेषमनीतयशोवद् यावत् सिद्धिः।

(३-८) द्वारिकानगर्यामरिष्टनेमिप्रभुसमवसरणम्, आजीवनषष्ठतपोभिग्रहाणां सहोदराणां षडनगाराणां त्रिभिर्युग्मैः भिक्षार्थगमनम्, एकयुग्मस्य वसुदेवराज्ञो देवक्या गृहे प्रवेशः, सिंहकेशरमोदकैः प्रतिलाभनम्, एवं द्वितीयस्य तृतीयस्यापि तत्रैवाऽऽगमनम्, किमत्र दौर्लभ्यं भिक्षायाः,

यत्तत्रैव पुनः पुनरनुप्रवेशः ? - इति देवकीप्रश्ने तृतीययुग्मेन सद्भावख्यापनम्।

अष्टसदृशपुत्रान् भरतक्षेत्रेऽप्यनन्य-सदृशान् प्रजनयिष्यसि त्वमिति मां प्रत्यतिमुक्तकुमारश्रमणेनोक्तं न मिथ्या-इति देवकीसङ्कल्पः, भगवदरिष्टनेमिपृच्छा, भगवदुत्तरम्- मृतपुत्रजननी बभूव सुलसा, तदाराधितहरिणैगमेषीदेवो युवयोः षट्पुत्राणां जातमात्राणां परावर्त्तं चकार, एवं तवैव ते पुत्राः, न सुलसायाः - इति।

पुनः षडनगारदर्शने देवक्या प्रस्रवा-

गमः, रोमोद्गमः, सुचिरमनिमिषदृशा प्रेक्षणम्, प्रत्यागमः, चिन्ता च सप्तपुत्रमात्राऽपि मया नैकोऽपि बालत्वे लालितः, कृष्णोऽपि वासुदेवो मासषट्के मासषट्के मद्वन्दनार्थमागच्छति, अतोऽ-धन्याऽहम् - इति।

स्ववन्दनार्थमागताय कृष्णाय स्व-चिन्तानिवेदनम्, कृष्णेनाष्टमभक्तेन हरिणै-गमेषिदेवाऽऽराधनम्, स्वकनीयः सहोदर-याञ्चा, सिंहस्वप्नसूचितपुत्रम्, सुकुमारतया गजसुकुमारनामस्थापनम्, भगवदरिष्टनेमि-

समवसरणम्, कृष्णगजसुकुमारयोर्निर्गमः, राजमार्गे सोमिलब्राह्मणदुहितृसोमां दृष्ट्वा कृष्णस्य गजसुकुमारार्थं तद्याञ्चा, कन्यान्तःपुरे प्रक्षेपश्च कौटुम्बिकपुरुषैः, देशनाश्रुतिः, गजसुकुमारवैराग्यम्, प्रव्रज्यानुज्ञायाञ्चा, कृष्णदत्तस्वराज्याभिषेकप्रलोभनावज्ञा, निर्बन्धत एकदिवसीयराज्यश्रीस्वीकारः।

प्रव्रज्या, तद्दिन एव स्मशान एकरात्रिकीमहाप्रतिमार्थं भगवत्पृच्छा, अनुज्ञाप्य तत्प्रतिपत्तिः, सन्ध्यायां समिदाद्यादाय ततो

व्रजतः सोमिलस्य तं दृष्ट्वा कोपोदयः - निर्दोषां सयौवनां च मत्सुतां विहाय प्रव्रजितोऽसौ - इति।

वैरनिर्यातनसङ्कल्पः, मुनिमस्तके मृतिकापालिकरणम्, ज्वलच्चितासत्क-रक्तखादिराङ्गारप्रक्षेपः, शीघ्रमेवापसरणम्, मुनेर्दुःसह्यवेदनावतोऽपि मनसाप्यप्रद्वेषः, कैवल्योदयः, सिद्धिः, देवकृतोत्सवश्च।

द्वितीयदिने भगवद्वन्दनार्थं कृष्णवासु-देवनिर्गमः, इष्टकां परावर्त्तयतो वृद्धस्य सहायार्थं स्वयमेकेष्टकापरावर्त्तनम्, तदनु-

यातानेकशतैरेवं करणे क्षिप्रमेवेष्टकाराशि-
परावृत्तिः।

भगवन्तं वन्दित्वा- क्व मम सहोदरो मुनिः - इति कृष्णप्रश्नः। साधितस्तेनाऽऽत्मनोऽर्थः - इति प्रोच्य भगवता तद्व्यतिकरज्ञापनमेकपुरुषव्यपदेशेन।

कृष्णः - क एष पुरुषोऽप्रार्थितप्रार्थकः, यो मत्सहोदरमुनिवधकः ?

भगवान् - मा तस्योपरि प्रद्वेषं कुरु, साहाय्यं दत्तं तेन गजसुकुमालानगारस्य, यथा त्वयाऽधुना वृद्धपुरुषस्य, तेन हि

गजसुकुमारमुनेरनेकभवलक्षसञ्चितं कर्मोदीरयता बहुकर्मनिर्जरार्थं साहाय्यं दत्तम्।

कृष्णः - कथं मया ज्ञातव्यः स पुरुषः ?

भगवान् - द्वारिकां प्रविशन्तं त्वां दृष्ट्वा भयाध्यवसानोपक्रमेण यो मरिष्यति, स तत्पुरुषतया ज्ञातव्यः।

ततो वन्दित्वा भगवन्तं कृष्णनिर्गमः। इतोऽर्हद्वचोज्ञातमच्चेष्टितः कृष्णो मारयिष्यति मां कुमारेण - इति भयोद्भ्रान्तस्य सोमिलस्य स्वगृहात् प्रतिनिष्क्रमः, द्वारिकां

प्रविशतः कृष्णस्य पुरस्तादागमनम्, भीत्या मरणम्, कृष्णेन तत्परिज्ञानम्, चाण्डालैस्तन्मृतकनिष्कासनम्, पानीयेन तद्भूमिशुद्धिकारापणं च।

(३-९) द्वारिकायां बलदेवराजधारिणीदेवीपुत्रः सिंहस्वप्नसूचितः सुमुखः, सर्वं सारणवद्यावत् सिद्धिः।

(३-१०-११) सुमुखवत्।

(३-१२) दारुको वसुदेवधारिणीसुतः, शेषं सुमुखवत्।

(३ - १३) दारुकवत्।

(४) दशात्राध्ययनानि - जालिः, मयालिः, उपयालिः, पुरुषसेनः, वारिषेणः, प्रद्युम्नः, शाम्बः, अनिरुद्धः, सत्यनेमिः, दृढनेमिः।

(४-१) द्वारिकाराजवसुदेवधारिणी-देवीसुतो जालिः, पञ्चाशत्कन्यापरिणयः, पञ्चाशद्धिरण्यकोटिस्वामित्वम्, षोडश वर्षपर्यायः, शेषं सर्वं गौतमवद्यावत् शत्रुञ्जये सिद्धः।

(४-२५) जालिवत्।

(४-६) कृष्णरुक्मिण्योः सुतः

प्रद्युम्नः, शेषं जालिवत्।

(४-७) कृष्णजाम्बवत्योः सुतः शाम्बः, शेषं जालिवत्।

(४-८) प्रद्युम्नवैदर्भ्योः सुतोऽनिरुद्धः, शेषं जालिवत्।

(४-९-१०) समुद्रविजयशिवयोः सुतौ सत्यनेमिदृढनेमी, शेषं जालिवत्।

(५) अत्राध्ययनानि दश - पद्मावती, गान्धारी, लक्ष्मणा, सुसीमा, जाम्बवती, सत्यभामा, रुक्मिणी, मूलश्रीः, मूलदत्ता।

(५-१) द्वारिकायां कृष्णवासुदेवस्य

देवी पद्मावती, भगवदरिष्टनेमिसमवसरणम्, सपरिवारकृष्णागमनम्, देशनान्ते किंमूलो भविष्यति द्वारिकाविनाश इति कृष्णपृच्छा।

भगवान् - सुराग्निद्वीपायनमूलः।

कृष्णचिन्ता - धन्यास्ते जालिप्रभृतिकुमाराः, ये हिरण्यादि त्यक्त्वा प्रव्रजिताः, अधन्योऽहं राज्यादिषु मूर्च्छितो न शक्नोमि प्रव्रजितुम्।

भगवान् - त्रिकालेऽप्यसम्भाव्या वासुदेवप्रव्रज्या, निदानकृतत्वात्तेषाम्।

कृष्णः - क्व ममोत्पत्तिः ?

भगवान् - द्वारिकादाहानन्तरं पाण्डु-मथुरां प्रति प्रस्थितस्य वने जराकुमारमुक्ते-षुविद्धवामपादस्य तव कालं कृत्वा तृतीयपृथ्व्यामुज्ज्वलिते नरके भविष्यति त्वदुत्पत्तिः (कृष्णशोकः) मा शोकं कुरु। ततोऽनन्तरमुद्वर्त्यानागतोत्सर्पिण्यां जम्बू-द्वीपभरतक्षेत्रे पुण्ड्रेषु जनपदेषु शतद्वारनगरे भविष्यसि त्वं द्वादशमोऽममनामाऽर्हन्।

कृष्णहर्षः, स्वनगरे घोषणाकारापणं च - भविष्यति सुरादिना द्वारिकानाशः, अतो द्वारिकायां योऽपि राजादिररिष्ट-

नेमिभगवदन्तिक इच्छति प्रव्रजितुम्, तं विसर्जति कृष्णः, अनुजानाति तत्कुटुम्बस्याऽऽजीवनं यथाप्ररूपितां वृत्तिम्। महर्द्धिसत्कारसमुदयेन करोति च तन्निष्क्रमोत्सवम् - इति।

पद्मावतीवैराग्यम्, प्रव्रज्या, आर्यायक्षिणीशिष्यात्वम्, एकादशाङ्गाध्ययनम्, बहुतपश्चर्या, विंशतिवर्षपर्यायः, मासिकानशनम्, सिद्धिश्च।

(५-२-८) पद्मावतीवत्।

(५-९-१०) मूलश्रीर्मूलदत्ता च

शाम्बकुमारभार्ये, शेषं पद्मावतीवत्।

(६) षोडशात्राध्ययनानि - मङ्काति:, किङ्कमः, मुद्गरपाणिः, काश्यपः, क्षेमकः, धृतिधरः, कैलासः, हरिचन्दनः, वारत्तः, सुदर्शनः, पूर्णभद्रः, सुमनोभद्रः, सुप्रतिष्ठः, मेघः, अतिमुक्तः, अलक्ष्यः।

(६-१) राजगृहनगरे मङ्कातिगाथापतिः, श्रीवीरदेशनाश्रुतिः, प्रव्रज्या, एकादशाङ्गाध्ययनम्, शेषं स्कन्दकवत्, गुणरत्नतपः, षोडशवर्षाणि पर्यायः, विपुलपर्वते सिद्धिः।

(६-२) मङ्कातिवत्।

(६-३) राजगृहनगरेऽर्जुनमालाकारः, बन्धुमतीभार्या, स्वपुष्पारामस्थं बहुकुलपुरुषपरम्परायातं मुद्गरपाणियक्षायतनम्, बालत्वादप्यर्जुनकृततद्भक्तिः, ललितागोष्ठीसत्कदुष्टपुरुषाणां तद्भार्याभिलाषः, यक्षायतने कृतप्रणामस्य तस्य सहसा तैर्बन्धनम्, तद्भार्योपभोगः, कथं ममैतादृशापद्गतस्यापि मुद्गरयक्षोपेक्षा, अतो नास्त्येतत्सन्निधानमिहेत्यर्जुनाध्यवसायः, तज्ज्ञात्वा तच्छरीरे यक्षकृतावेशः,

बन्धच्छेदः, मुद्गरेण पुरुषषट्कस्य स्त्रियश्च घातः।

ततोऽपि प्रतिदिनं यक्षाविष्टेन तेन पुरुषषट्कसहितस्त्रीघातनम्, मा कोऽपि काष्ठाद्यर्थं स्वैरं निर्गच्छतु, अर्जुनमाला-कारभयात् - इति श्रेणिककारापितघोषणा।

राजगृहे सुदर्शनश्रेष्ठी श्रमणोपासकः, श्रीवीरसमवसरणं श्रुत्वाऽवगण्यार्जुनोपसर्गं जिनवन्दनाद्यर्थं प्रस्थानम्, मुद्गरपाणि-यक्षस्य तद्घातार्थं सम्मुखमागमनम्, सुदर्शनस्य सर्वप्राणातिपातादि- अशनादि-

प्रत्याख्यानपूर्वं सागारिकप्रतिमाप्रतिपत्तिः, तत्तेजसाऽभिभूतस्य यक्षस्याक्रमणासामर्थ्यम्, सुचिरं सुदर्शननिरीक्षणम्, अर्जुनशरीरं परिहृत्य प्रतिगमनम्, अर्जुनस्य तदैव सर्वाङ्गैर्भूमिपतनम्।

निरुपसर्गमिति सुदर्शनेन प्रतिमापारणम्, तेन सहार्जुनस्य भगवदन्तिके गमनम्, देशनाश्रुतिः, अर्जुनस्य प्रव्रज्या, तद्दिन एव यावज्जीवं षष्ठतपोऽभिग्रहः। राजगृहे भिक्षार्थमटतस्तस्य 'मत्पित्रादिमारकोऽयमिति कृत्वा लौकैराक्रोशनिन्दाताडनादिकरणम्,

तत्सर्वस्यानेन मनसाप्यद्विष्टेन सम्यगध्यासनम्, भक्तपानान्यतराप्राप्तिः, तथाप्यविषादभावः, षण्मासपर्यायान्ते पाक्षिकानशनपुरस्सरं सिद्धिः।

(६-४) काश्यपस्यापि मङ्कातिवत्सिद्धिः।

(६-५) एवं क्षेमकस्यापि, नवरं काकन्दी नगरी।

(६-६) धृतिधरस्य क्षेमकवत्सिद्धिः।

(६-७) कैलासस्याप्येवमेव, नवरं साकेतनगरम्, द्वादशवर्षपर्यायः।

(६-८) हरिचन्दस्य कैलासवत्।

(६-९) वारत्तस्यैवम्, राजगृहनगरम्।

(६-१०) सुदर्शनस्य वणिग्ग्राम-नगरम्, पञ्चवर्षपर्यायः, शेषमुक्तवत्।

(६-११) पूर्णभद्रस्य सुदर्शनवत्।

(६-१२) सुमनोभद्रस्य श्रावस्त्यां बहुवर्षपर्यायः, शेषमुक्तवत्।

(६-१३) सुप्रतिष्ठितस्य श्रावस्त्यां २७ वर्षपर्यायः।

(६-१४) मेघस्य राजगृहे बहुवर्ष-पर्यायः।

(६-१५) पोलाशपुरे विजयराजाश्री-देवीपुत्रोऽतिमुक्तककुमारः, अन्यबालैरभि-रमतस्तस्य गौतमस्वामिदर्शनम्।

अतिमुक्तकः - के यूयं भदन्त ! किमर्थं वाऽटत ?

गौतमस्वामि - वयं श्रमणा निर्ग्रन्था यावद् भिक्षार्थमटामः।

अति० - आगच्छत यूयम्, अहं दापयामि युष्मभ्यो भिक्षाम्।

अङ्गुल्या गृहीत्वा तेन स्वगृह आगमनम्, श्रीदेव्याः प्रतिलाभनं च।

अति० - क्व यूयं परिवसत ?

गौ० - मद्धर्माचार्यश्रमणभगवन्महावीरसमीपे ।

अति० - आगच्छामि युष्मत्सहितस्तद्वन्दनार्थम् ?

गौ० - यथासुखम्।

अतिमुक्तकस्य भगवद्वन्दनादि, देशनाश्रुतिः, पित्रोरग्रेऽनुज्ञायाञ्चा।

पितरौ- बालोऽसम्बुद्धोऽसि त्वम्। किं जानासि धर्मम् ?

अति० - यज्जानामि तदेव न जानामि, यन्न जानामि तदेव जानामि।

पितरौ० - कथम् ?

अति० - जानामि यथा जातेनावश्यं मर्त्तव्यम्, न तु जानामि कस्यां वेलायां कुत्र केन प्रकारेण कियच्चिरेण वा। न जानामि कैः कर्मायतनैर्नैरयिकादिषूत्पादः, जानामि तु स्वकैः कर्मायतनैस्तदुत्पाद इति।

एकदिवसराज्यश्रीः, प्रव्रज्या, महाबलवत्सामायिकाद्यध्ययनम्, गुणरत्नतपो यावद्विपुले सिद्धः।

(६-१६) वाणारस्यामलक्ष्यराजा, श्रीवीरदेशनाश्रुतिः, प्रव्रज्या, ११ अङ्गाध्ययनम्, बहुवर्षपर्यायो यावद् विपुले सिद्धः।

(७) अत्र त्रयोदशाध्ययनानि - नन्दा, नन्दमती, नन्दोत्तरा, नन्दश्रेणिका, मरुता, सुमरुता, महामरुता, मरुदेवा, भद्रा, सुभद्रा, सुजाता, सुमनायिका, भूतदत्ता।

(७-१-१३) सर्वा अपि श्रेणिकराजभार्याः, श्रीवीरदेशनाश्रुतिः, पद्मावतीवत्सिद्धिः।

(८) अत्र दशाध्ययनानि - काली, सुकाली, महाकाली, कृष्णा, सुकृष्णा, महाकृष्णा, वीरकृष्णा, रामकृष्णा, पितृसेनकृष्णा, महासेनकृष्णा।

(८-१) श्रेणिकभार्या काली, नन्दावत्प्रव्रज्यादि, आर्यचन्दनान्तिके रत्नावलितपोऽनुज्ञा, पञ्चसंवत्सरमासद्वय-अष्टाविंशतिदिवसैर्यथासूत्रं तदाराधना, चतुर्थादिबहुतपश्चर्या, तपस्तेजःश्रियोपशोभमानाया मांसादेरत्यन्तमपचयः, मासिकानशनेन सिद्धिः।

(८-२) एवं सुकाल्यपि, नवरं कनकावलितपः, (५ वर्षानि, ९ मासाः, १८ दिनाः) नववत्सरपर्यायः।

(८-३) एवं महाकाल्यपि, नवरं क्षुल्लकसिंहनिष्क्रीडिततपः (२ वर्षे, २८ दिनाः)

(८-४) कृष्णाऽपि, महासिंह-निष्क्रीडिततपः (६ वर्षाणि, २ मासाः, १२ दिनाः)

(८-५) सुकृष्णापि, सप्तसप्तमि-

कभिक्षुप्रतिमा यावद् दशदशमिकभिक्षु-प्रतिमा (२४५ दिनाः)

(८-६) महाकृष्णापि, क्षुल्लकसर्वतो-भद्रतपः (१ वर्षम्, १ मासः, १० दिनाः)

(८-७) वीरकृष्णाऽपि, महासर्वतो-भद्रतपः (२ वर्षे, ८ मासाः, २० दिनाः)

(८-८) रामकृष्णाऽपि, भद्रोत्तर-प्रतिमा (२ वर्षे, २ मासाः, २० दिनाः)

(८-९) पितृसेनकृष्णाऽपि, मुक्ता-वलितपः। (३ वर्षाणि, १० मासाः)

(८-१०) महासेनकृष्णाऽपि, आचाम्लवर्धमानतपः। (१४ वर्षाणि, ३ मासाः, २० दिनः)

आसां पर्यायोऽष्टसंवत्सरादारभ्य एकोत्तरवृद्ध्या सप्तदशवर्षान्तो ज्ञेयः।

मिथ्याऽस्तु दुःसञ्चितं मम। शोधयन्तु बहुश्रुताः। सञ्चयोऽयमाचार्यकल्याणबोधेः कर्मारिशून्यनेत्रे (२०६८) वैक्रमेऽब्दे वैशाखासितपञ्चम्यां सम्पन्न इति शम्।

## ◆ નવલા નજરાણા ◆


(૧) **તત્ત્વપ્રેમ** → પ.પૂ.શ્રીહરિભદ્રસૂરિ મહારાજા કૃત **યોગબિંદુ** ગ્રંથ પર નવનિર્મિત સંસ્કૃત શ્લોકવાર્ત્તિક.

(૨) **અધ્યાત્મદર્શના** → **મહોપનિષદ્** નામના પ્રાચીન હિંદુ ગ્રંથની નવનિર્મિત સંસ્કૃત ટીકા.

(૩) **સુધોપનિષદ્** → મહો. શ્રીયશોવિજયજી કૃત **વૈરાગ્યકલ્પલતા**-અંતર્ગત '**સમાધિસુધા**' પર નવનિર્મિત સંસ્કૃત ટીકા.

(૪) **શ્રુતમહાપૂજનમ્** → દ્વાદશાંગી સહિત ૮૪ આગમો તથા ૧૦૮ શાસ્ત્રોનું વિધિસહિત પૂજન.

# Don't Miss it.




मूलकाराः

श्रीहरिभद्रसूरयः

वृत्तिकाराः

श्रीकल्याणबोधिसूरयः

## લાભાર્થી

# શ્રી સીમંધર જિન આરાધક ટ્રસ્ટ

એમરલ્ડ એપાર્ટમેન્ટ, અંધેરી (પૂર્વ), મુંબઈ.

જ્ઞાનનિધિના સદ્વ્યય બદલ
શ્રીસંઘ તથા ટ્રસ્ટીઓની
ભૂરિ ભૂરિ અનુમોદના